अग्निशिखा

(विप्रलम्भगीतिमालिकेयम्)

रचयित्री

दीक्षितपुष्पा

पाणिनीय शोध संस्थानम्

बिलासपुरे

१९८५

पुरोवाक्

कौञ्चद्वन्द्ववियोगोत्थशोकः श्लोकत्वमगादादिकवेर्यस्तेन सहैव काव्यस्यानुभूतिगम्यत्वं सुतरां प्रतिष्ठितम् । विषमापीयं सरणिर्जगतोऽनादिपरम्परयाध्यासीना तद्वदेव प्रतिपादयति समतामेव तथापि दृश्यते वैषम्यं व्यक्तिभेदेन । एकैव घटनाऽवलोकिता नोत्पादयति प्रभावं सममेव मानसेषु सर्वजनानामित्यनुभूतिरपि भिद्यते व्यक्तिभेदेनेति सहृदयसंवेद्यत्वमपि काव्यस्य प्रतिष्ठितम् । अनुभूयमाना भावाः संसारस्य कस्यचिदेवाभिव्यक्तिचारुत्वञ्जनयन्ति । भावोद्वेगोऽपि सर्वेषां मनःसु समानो नोपजायते, येषाञ्च जायते न ते सर्वेऽपि तमभिव्यञ्जितुमलम्भवन्ति । अतोऽयं मार्गः काव्यस्य भावोद्वेगं तदभिव्यक्तिक्षमत्वञ्चापेक्षते । साधारणोऽप्ययमुद्वेगः कविसहृदययोः कविष्वेवाभिव्यक्तिमर्हति । एतदर्थमेव द्विधा व्यवस्थापिता प्रतिभा राजशेखरेण कारयित्री भावयित्रीतिभेदेन । तत्र निरपेक्षाऽनाश्रितभेदेयं कारयित्री प्रतिभैव कविकर्मसु प्रयोजयति, संस्काराहितभावबन्धाँश्च विमुञ्चति वाङ्मये । दृश्यमानान्सर्वानपि भेदानवगणय्याप्रतिहतं प्रसरति सेत्यपार्थकोऽयं भेदः स्त्रीत्वनिबन्धनः पुंस्त्वनिबन्धनो वयोनिबन्धनो वा । अत एवोक्तं राजशेखरेण- "योषितोऽपि कवीभवेयुः संस्कारो ह्यात्मनि समवैति, न स्त्रैणं पौरुषं वा विभागमपेक्षत इति ।" (काव्यमीमांसातः)

प्रकृतिसिद्धमिदं मृदुत्वं नारीहृदयस्य पुरुषेभ्योऽधिकमिति घनत्वमनुभूतीनां, तीव्रत्वं संवेदनानामुद्वेगो भावानामात्मना समर्पणं हृदयस्यानिरुद्धवेगश्च स्नेहस्य जनयन्ति संभावनां काव्यबीजस्य नारीमनःस्वेव चिरमतनु च प्रसरणाय पल्लवनाय वा । चारुत्वन्त्वसाधारणधर्मविशेषो नारीणामिति सुसिद्धमपि चेत्संगच्छते शास्त्रीयेण वैदुष्येण तर्हि दधाति नितरां मनोहारित्वमित्याचार्यायास्त्रिवेदिपुष्पायाः सरसभाव-

सिन्धोरुच्छलितमिदमुच्छ्वसितं काव्यस्य न केवलमुचितं प्रशस्यमपि । भावप्राचुर्यमेव हेतुरत्रातिस्पृहणीयाग्निशिखायाः प्रज्वलने । या विलक्षणा ज्वलितमपि भावनिकरं जीवयति ।

इयमग्निशिखा ज्वलिता सहसैव कथं हृदये ।
निशितैस्तव दृष्टिशरैः सकलं शकलीक्रियते ॥
संदह्य मनोभावं गलिताधिरहं जाता ।
ज्वालैरतिजवनयुतैर्ज्वलितं ननु जीवयते ॥

भावपीठिकायामस्यामेव समाधृतेयं कृतिर्लब्धावकाशान्तर्वेदनास्वेत्र । लोकयात्रावलम्बभूतप्रज्ञाकारायां विनिबद्धः सङ्कुलितो व्याकुलितो व्यालुलितश्च भावोद्रेको भित्वाखिलबन्धान्निर्याति यदा द्रुतन्तदा लोकप्रमापकानि सर्वाण्यपास्यन्ते । इदमेव घटितमिहापि । यथा यथा विमुच्यन्ते शास्त्राणि प्रज्ञाहितानि तथा तथा त्वरते हृदयमातुरतापन्नम् । सर्वं ज्ञानसमुदयं विभवनिकरञ्चापहृत्य सर्वोत्कर्षेण वर्ततेऽयं प्रवाहो नैसर्गिकभावसरितो या घनीभूतापि द्रुतन्द्रुतिमुपागता प्रियदर्शनेन । कविरेव जायते वारम्वारं काव्येष्विवेति निर्बाधं कथनीयं यद् ध्वन्यतेऽनया साक्षात्कृतं स्नेहबन्धस्यापरिहार्यत्वं प्रतिपदम् । न विद्यते चेज्जीवने सकलमानवीयसम्बन्धानामाधारभूतोऽयं चरमस्रोतस्तर्हि शून्यता व्यर्थता वा तस्य स्पष्टमेवेति भावना मुखरिता सर्वत्र । चिरसञ्चितानामाकुलभावानामनिरुद्धगतिप्रवाहश्छित्त्वा हृदयग्रन्थीन्निर्गतो दरीदृश्यते समन्तात् । स च धारणाक्षमत्वमपि मनसोऽतिक्रम्य वरीवृत्यते ।

सिन्धुमन्थनेनोद्गतममृतमिव हृन्मथनेनोद्गतेयं धारा काव्यस्य स्पृशन्ती हृदयकुहराणि सहृदयानां, सञ्चालयन्ती चित्तानि धीराणां, निविशन्ती मनःसु मनस्विनामाददती च सघनपीडाकुलमात्मकुक्षौ पनीपत्यते वेगेन । सर्वत्र द्रष्टुं शक्यते व्याकुलतेयं व्यथाकुलितस्य हृदयस्य । यतते चेतः सततं सङ्गमनाय परन्तैराश्यमूलकं वैलक्ष्यन्न जहाति मनः क्षणमपि ।

नैतदपि यन्न कृतमुद्यमनं प्रियसङ्गमाय। निखिलेऽपि रत्नाकरे विलोडिते रत्नस्यैकस्याप्यनधिगमनमधिजिगमिषां तीव्रतरां द्योतयितुमलमिति। सर्वान्पथो विहाय एक एव पन्थाः समाश्रितः येन गन्तुं शक्यते प्रियहृदयं, यस्मिँश्च समाहिता सारता सारमयस्य भुवनस्यासारता चान्यदीयस्य।

आधारभूतेयं भावना प्रियसङ्गविषयिणी न हीयते क्षणमात्रमपीति निर्वहणं बीजस्य न परिहृतं सर्वथा। मेलिष्यति जनः कोऽपि भवत्समो येन सह समुपजनिष्यते बन्धश्चेतस इत्याकाङ्क्षया प्रतीक्षया च सार्धमेव हृतं वयो यातमिति विप्रलम्भस्य प्राणभूतेयं संजिगमिषा प्रियेण, यियतिषा मनसो, विदधिषा बहूपायानां, जिगाधिषा च प्रियमनसि वरीवृत्यन्ते संच्छाद्य कृतिमिमाम्। वैशिष्ट्यं प्रतीकानां, वैविध्यं कल्पनानां, वैचित्र्यञ्चोक्तीनामाद्यन्तमाकीर्णानि येषामवलम्बनेन विशिष्टोऽयं भावलोकोऽधिगन्तुं शक्यते, यश्च सुखदुःखात्मिकां लौकिकीमनुभूतिं विहाय भावसमावेर्नातिभिन्नं वर्तते।

नैसर्गिकोऽयं स्नेहबन्धो नापेक्षते सीमानं न वा द्विनिष्ठत्वम्। विलक्षणेयं शालभी रीतिः प्रीतेर्यत्र शलभेन परित्यज्यमानाः प्राणा नावगम्यन्ते दीपकेन, यत्र सुधांशुकृते जनितः प्रोन्माथस्तोयराशेर्नावगम्यते सुधांशुना, यत्र नलिनीगतोऽनुरागो नावगम्यते चञ्चरीकेणेत्येकनिष्ठैव प्रीतेर्दृश्यते सर्वत्र। पारसरत्नमप्यतिशय्य वर्तते दर्शनं प्रियस्य यदयोनिभं हृदयं दर्शनेनैव कनकं विदधाति। दन्दह्यमानमन्तर्दाहेन परिलक्ष्यते हृदयं प्रतिपदम्। यतोऽनन्तपीडाकरी संविदेव कल्पिता काव्यहेतुत्वेनातो ग्रन्थाऽवसानेऽनवसितागीतिरानन्त्यं तस्याः पीडाया द्योतयितुमलम्।

गता नो गन्ता वा शममपि च पीडाऽनवसिता
न याता नो याता क्षणमपि विरामं मम कथा।
न रेमे रन्ता वा विकलितमिदम्मे हृतमनो–
मनोज्ञोऽसि त्वं रे! न च मम मनोऽज्ञायत कथम्?

अनीप्सितत्वेऽपीप्सितत्वं, वैरस्येऽपि स्वारस्यं, नैष्ठुर्येऽपि समर्पणञ्च प्रीतेरेकनिष्ठतामैकान्तिकतां श्लाघनीयपरावस्थाञ्च द्योतयन्ति। जीवनस्यामन्दसुखवृन्दमपि परिसमाप्तं मतं यस्मिन्, यत्र प्रवृत्तं मनः कथमपि नो परावर्तते, यश्च मनोरथानां पराभूमिस्ततोऽपि नाधिगम्यतेऽनुरागबिन्दुरपि चेत् तर्हि युज्यत उपालम्भपरम्परेयं बहुविधा। यस्य दर्शनेन जीवनं कृतार्थता-मुपैति स तु दर्शनप्रदानमप्यनुग्रहाय मन्यते, यस्तु स्नेहसिन्धु-रपि सन् बिन्दुदानेऽपि कृपणः, यश्च विशालतमेऽपि हृदये कोणमेकमपि दातुमौदार्यविहीनः स कथन्नोपालम्भनीयः।

प्रीतिमञ्जरीरसं निपीय यो न मोदते
किं समायुतं मनोऽतिनिर्दये तथाविधे।
यस्तु सौख्यमप्युपेक्षते यशोऽभिलिप्सया
वेत्ति नो धराऽधरा मनोनिबन्धनादृते॥

अपि च— मधुराकृतिस्त्वदीया कलिता यदा गुणेन
जाता विचित्रतेयं दाहस्तु चन्दनेन।
भावोदयं विहन्तुं जानाति योऽवमन्तुं
अयि! मे हते दुराशे संश्लेषमेषि केन?

एकाकित्वानुभूतिरपि स्वीयाऽभिव्यज्यमाना दृश्यतेऽने-कशः। तीव्रतरातुरता, तरलतापन्नं हृदयमौत्कण्ठ्यञ्चादम्यं पोषयन्त्यसकृत्तां प्रतिपदम्। व्याप्यमानेयं धारा वियोगस्य तरलयन्ती सहृदयहृदयानि, सिञ्चन्ती च बीजं विप्रलम्भस्य प्रवहमानाऽनेकधा द्रष्टुं शक्यते ययाऽभिषिक्तमिदं बीजं तरसा द्रुमायते शिशिरयति च तापं काव्यरसिकानाम्। वैविध्ययुतोऽयं छन्दोबन्धोऽपि प्रशस्यः यस्मिन् ग्रथितैः प्रकृतिपेशलैर्भावैर्भाव-दीप्तिर्दीप्यतेऽनुभूयते च वारम्वारम्। पदान्यपि झटिति भावै-रानुकूल्यमेत्य स्वयमेवावतीर्णानीव दृश्यन्ते येषां लालित्यमपि सुतरां लालनीयः।

प्रथमेयङ्कृतिरित्याकण्ठमाप्लावनन्तरलायितसंवेदनसरसि, साक्षादवलोकनमात्मानुभूतीनामुद्दीपनञ्च प्रतिभाया घनतामेवोपैष्यन्त्युत्तरोत्तरमित्याशास्यते । दृढताञ्चोपयास्यति भावभूमावावृतं भवनं भावबन्धानाम् । समन्तादिह परिलक्षितमात्मविस्मरणञ्च यत्कृते प्राथम्यमेवापेक्षते न चरमत्वमिति संभावनमपि वरीवृध्यते काव्यरसिकानाङ्कृते काव्यमधुरिम्न इत्युद्धरणीयमिदं मननीयं वचनमानन्दवर्धनाचार्यस्य ।

प्रतायन्तां वाचो निमितविविधार्थामृतरसा
न सादः कर्तव्यः कविभिरनवद्ये स्वविषये ।
परस्वादानेच्छाविरतमनसो वस्तु सुकवेः
सरस्वत्येवैषा घटयति यथेष्टं भगवती ॥

(ध्वन्यालोकतः)

संस्कृतकाव्यपथमनुप्रयातानां सहृदयपथिकानां हृदयेषु चिरं चकास्त्वियमग्निशिखेत्याशासानः ।

डॉ. कृष्णकान्त चतुर्वेदी
आचार्योऽध्यक्षश्च
संस्कृतपालिप्राकृतविभागानाम्,
रानीदुर्गावतीविश्वविद्यालये, जबलपुरे (मध्यप्रदेशे)

हृद्गतम्

प्रज्ञावतां विदुषां कुले जनिरेव प्राक्तनसंस्कारविशेषैः संभवतीति संभावना मदीयसुसंस्काराणां पूर्वकृतां प्रथिमानमुपनीतापि क्व विलोपमयासीदिति चिन्तयितुं न शक्यतेऽद्यावध्यपि यच्चक्षुषोरुन्मीलनादेव घटनात्प्रागपि विघटनस्यानवसिता परम्परेयं पोषकरी दुर्दैवस्य मेऽनवरुद्धगतिविसङ्गतितितिभिस्तन्यतामुपेत्य तनोति जीवनस्य जाज्वल्यमानताम्। द्विविधमिदं विधानं भृशं क्षिणोति मे चित्तं प्रतिक्षणं यदक्षय्यस्नेहसमुदयमप्युपेत्य किमुपनीयते प्रकृतिपेशलस्य नारीजनस्य नारीत्वमेव प्राधान्यम्। नोपजायेतेदमाश्चर्यावहं दोषावहं वा स्त्रीत्वमेव पुरस्कृत्य प्रवर्तनापरायामस्यां भूमौ, परं दुःखावहन्तु दूयमानमनसः समुपजायत एवेत्यन्यथाकर्तुं नैव शक्यते विचारसरणीयं सततं चिन्तयमानाया अपि। नारीजनसुलभसंवेदनबहुत्वञ्च बाहुल्येनाधिगतमनेन हतहृदयेनेत्यनवसानमपि पीडासमुदयस्यौचित्यकरमेव सर्वथा। नव्यव्याकरणे दत्तावधानाया अप्यस्याश्चित्तमिदं बलान्नीयते यदि काव्यरचने तर्हि युक्तमिदं वक्तुं यत्सान्तेऽप्यस्मिञ्जगत्यनन्तपीडाकरी संविदेव काव्यहेतुत्वेनानुभूता मया न कल्पिता। लेखनमुद्दिश्य तु क्वचिदपि किञ्चिदपि नैव लिखितम्मया। यदाऽप्यपरिहरणीयं जातमलेखनं तदैव कृतेयं धृष्टता स्वीयमल्पज्ञत्वं सम्यग्जानन्त्या अप्यनया लेखन्येति सर्वथा क्षमामर्हतीयमकिञ्चित्करी बुधजनैरुदारमनस्कैः।

नैव शक्यमधिगन्तुमनवधि विधिविलसितं किमिति निखिलमपि जननमजायत विलासभूमिर्दुरदृष्टस्य यस्यामुन्मथितोऽयं भावोद्वेगो नाशक्यतावरोद्धुं प्रयत्नविधृतोऽपि। धारा च तस्य नावधारिता नैवाप्यवधीरिता मया। बन्धसहस्रमपि भित्त्वा द्रुतन्निर्गतायास्तस्याः शततमोऽप्यंशोऽभिव्यक्तिं नोपागत इत्येवानुभूयतेतराम्। न सर्वं वाचाभिव्यज्यत इति भावो द्रढिमान-


गुपैत्युपैष्यति च । अपि च यो हृदयमवजानाति स गिरा कथं जानातीत्यनुभूतिगम्यत्वमेव सुतरां निश्चीयते काव्यस्य । अनुभूतीनामवगमोऽनुभूतिभिरेव संभवतीति शब्दव्यवायमपास्यैव तत्र गन्तुं शक्यते । अरुन्तुदनुभूतीनां क्षयोऽपि न जायते संवेदनबहुले मनसीत्यवसानमपि कथं शक्यते तासाम् ? एतदर्थमेव चरमगीतिर्मयानवसानत्वेन व्यपदिष्टा यस्याञ्च शब्दसमुदयस्य कोशनिकरस्य वा वैयर्थ्यं सर्वथा स्वीकृतम् ।

न वर्णैस्तद् वर्ण्यं प्रिय ! यदनुभूतं हृदि मया
क्षरत्वं गच्छेन्मेऽनवरतविलापेऽक्षरकुलम् ।
विभिन्नैः शब्दार्थैर्विपुलविपुलः कोशनिकरः
क्षमो नो क्षन्ता वा विशकलितमेतत्कलयितुम् ॥

अतलजलकुलकलितहृदयसागरस्योत्तालतरङ्गकुलमनवगाह्यावगाह्यन्ते यदा वाह्योपचारा, यदा च निरुपधिर्निरवधिर्निरपेक्षो निस्सीमश्चायं स्नेहवन्धोऽपि बध्यमानो दरीदृश्यतेऽनभिलषितवन्धनेषु तदा भृशमाकुलीभूयानिवष्यति चित्तं राधिकायाः प्रशस्यरागसागरेऽवगाहनपरं कृष्णं येन प्रदर्शिता विलक्षणाऽप्यभिलषणीया पद्धतिः प्रेम्णो ययाऽधरीक्रियन्ते रूपं वयो जातिरन्यानि च सर्वाण्यपि लोकबन्धनानि । सीमाबद्धोऽयं लोकः सर्वतस्सीमानमेवापेक्षते । प्रीतेरपरपर्यायमीश्वरमपि निबध्नाति यो बन्धनेषु स कथं सहते नीतिं रीतिं चातिक्रम्य वर्तमानाया निरुपधिप्रीतेर्निस्सीमत्वम् ? सकलबन्धनसमुदयमपास्य मनोनिबन्धनेनैव निबद्धया राधिकया समं संपूजितो विश्वस्मिन् स कृष्णोऽपि पाषाणत्वमेवोपनीतः पाषाणहृदयेन लोकेन, भ्रमति च राधिका तदीयमन्तर्दृष्टिगवेषणे । न चाऽद्यासौ क्षमा तरलयितुं तरलीकृतेनापि हृदयेनेति भ्रमिष्यत्येव सा वियोगविकलिता । सततं गरलपायिनो जीवनेऽनायासं समागतं पीयूषमपि गरलायते चेत्तर्हि नात्र चित्रं किमपि न वा नियतिविरुद्धम् । तथाप्युपहसनीयता यायत्यते यदि मनो नियतिविलङ्घने ।

पूजनीयपितृचरणैर्गुरुचरणैश्च यैर्गीर्वाणीसुधासरस्याप्लाव्यानुकम्पितं चेतस्तन्माधुरीविमोहितं न रमते संस्कृतसमाराधनादन्यत्र क्वचिदपि, येषाञ्च शुभाशीर्भिरेव प्राकाश्यन्नीतेयं कृतिस्ते सर्वेऽपि गौरवशालिनो गुरुवर्यास्सादरं समर्चनीयाः। येषामविच्छिन्नहृदयतन्तवोऽनवरतं संयुज्य मनसा मे विजानन्ति मनोगतमकथितमपि, विचारयन्ति च यानि मद्गतमेव तानि प्रियमित्राण्यपि सस्नेहं स्मर्तव्यानि।

यदि संस्कृतज्ञसहृदयानां हृदि मोदमाधास्यतीयं दोषबहुलाल्पमपि तर्हि धन्या भवेयमित्याशयैव प्रस्तौमि भवतां दोषज्ञत्वेन (पाण्डित्येन) सम्यक्परिचिताऽप्यहं दोषानुपेक्ष्य हृद्भावग्रहणायैवाऽनुरुन्धाना। पदसंख्यातोऽपि भूयसी दोषाणां संख्या संभविष्यतीति जानानापि यन्निवेदयामि कृतिमिमां तत्सुधीजनधीरतापन्नधियो विश्वासोपगमादेवेति सर्वथा क्षन्तव्येयं विदुषां वशंवदा सहृदयाधीना—



पाषाणाभिहतैः पयोदपटलैर्नीरत्वमासाद्यते
तद्वत्तेश्मसमेऽसमे हृदि घने जेघ्नीयमानेन मे।
नीरीभूय विनिर्गतेन मनसा या नैव निर्वापिता
स्नेहाम्भःपरिषेचनं मृगयतेऽग्नेस्तन्तन्यमाना शिखा॥

स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम्।
असन्निवृत्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः॥

इतीयमाशाक्षयमादधाना
शतव्यवायैरपि जीव्यमाना।
येनाऽनुभूता मनसो दशा मे
तस्मै हृदा काव्यकृते नतेयम्॥

वन्दनम्

येनाहं सुरभारतीसुरसरित्स्रोतःसु संप्लाविता
गैर्वाणीरसमाक्षरत्सुरतरोश्छायासु संवर्धिता।
यस्योत्सङ्गसुखं निषेव्य जनिरप्युत्कर्षमासादिता
श्रीमत्सुन्दरलालशुक्लमनघं तातं सदाहं नता॥

ज्ञानप्रभामुदितमानसचारुशोभं
तेजस्विनां प्रथम इत्यभिधानयोग्यम्।
अन्तःप्रकाशनिवहेन निरस्तदोषं
तं पूज्यपादपितरं हृदयेन वन्दे॥

भाग्यं विधाय विधिना न कृतं कदापि
सिंहावलोकनमपि क्षणमात्रमत्र।
मद्दुष्टदिष्टदलनञ्च कृतन्तथापि
तं पूज्यपादपितरं हृदयेन वन्दे॥

वात्सल्यस्य परं पदं विपदमुच्छेत्तुं सदा मे रता
तापं जर्जरितं करोति मनसो मूर्तिश्च यस्याः स्मृता।
लोकेऽस्मिँल्लघु लभ्यमप्यभयदं स्थानं यदीयाञ्चलं
वन्देऽहं मनसा सदा नतिभृता तां मातरं जानकीम्॥

आबाल्यान्निचिता चितासमजवज्वाला कराला चला
प्रारब्धानिलवीजनैरपि जनैर्दोधूयमाना च सा।
त्वत्कारुण्यनिकामनीरदघटानीरेण निर्वापिता
मातस्ते चरणाम्बुजप्रणयिनी शश्वन्नतेयं सुता॥

येनोद्भ्रान्तदिगन्तरालयशसायत्तीकृता भूरियं
तेजोभिः किल मादृशाञ्च जडताजातं विदूरीकृतम्।
औदार्यामृतधारयाऽवनमितं चेतः सदा येन मे
वन्देऽहं विदुषां वरं गुरुममुं श्रीविश्वनाथाभिधम्॥

◆◆◆◆◆

गीताऽनुक्रमः

१. अवतरणम्
२. अग्निशिखा
३. तव नामाक्षराणि
४. वीतदये हृदये
५. यापितन्न मनोऽपि शम्
६. नगेशशृङ्ग एष पातितः कथम्
७. सैव वीथि
८. मम वामनवृत्तिरियम्
९. विप्रलम्भ एव शिष्यते
१०. कीदृशं परिवर्तनम्मे
११. अहमेव किन्न निदर्शनम्
१२. लब्धं न रत्नमेकम्
१३. व्यर्थं वयो भवता विना
१४. दर्शनं स्वपनेऽपि नो
१५. परितोषोऽद्य धरामधिशेते
१६. जाता विचित्रतेयम्
१७. पाशसन्दाने समीहा
१८. रोचते नैव किञ्चित्
१९. व्यथितं मनो न निवार्यते
२०. अयमेव मेऽपराधः
२१. स्ववशता सा कथं वीता
२२. कोणमेकं देहि मे
२३. इयती करुणा न त्वया कृता
२४. मानसेन चम्पकायितम्
२५. हृदि काङ्क्षया विगतं वयः
२६. हृन्निलयं समुपैषि कथम्
२७. मृत्युरेव मृतः
२८. पारसरत्नमिदम्
२९. कथमिव न क्षीयते क्षपा
३०. अत एव न मे क्षीयते क्षपा
३१. स्नेहबन्धनं विना
३२. दयसे न किम्
३३. विशकलिता विकचवनीयम्
३४. मम जीवनलतिके
३५. द्विरेफता विहीयतां सखे
३६. तव दर्शनैषणा
३७. नो लभ्यसे मया चेत्
३८. अतिथिरसौ
३९. प्रीतिरीतिरीदृशी
४०. हृदयेन मे तरलायितम्
४१. कथयस्व मे मनस्त्वम्
४२. चेतो भाविनि जन्मनि
४३. न विन्दसे त्वम्
४४. सुखं क्वाद्य गतम्
४५. नैव तथापि
४६. निर्बन्धो मे मनसि
४७. हृदयस्य गृहं ज्वलितम्
४८. अनवसानम्

अवतरणम्

श्रिया दुरापः कथमीप्सितो भवेद्
यदुक्तमेतत्कविना[१] मृषा वचः।
मयेप्सितस्त्वं मनसोऽतितीव्रगै-
र्वेगैस्तथापीह दुरापणीयता॥

सापेक्षताहीनमुपाधिहीनं
यत्प्रेम जायेत यदा यदर्थम्।
ध्रुवं भवेत्सङ्गमनञ्च तेन
मुधा यदुक्तं कविनाऽनुगेन[२]॥

उद्वेल्लितो रागसमुच्चयो यो
निष्कारणं मे हृदये त्वदर्थम्।
तथापि ते सङ्गमने निराशा
कविप्रमाणं वितथीकरोति॥

स्नेहादृते मे नहि कोऽपि कामो
यन्मे विधात्रा निखिलं प्रदत्तम्।
त्वयाऽप्यदत्त्वा हृदये निवासं
वृथाकृतं कान्त! कविद्वयोक्तम्[३]॥

नो जाने कविकर्म मर्म कविताया वर्त्म काव्यस्य नो।
प्रज्ञाहीनतया मयाऽननुगतो मार्गः कवीनां सताम्॥
यन्नैसर्गिकहृत्सरित्तरलतापूरो निरुद्धो मया।
भित्त्वा बन्धसहस्रमद्य सहसा सोऽयं द्रुतं निर्गतः॥

शक्तिर्नास्ति मनीषिभिर्निगदिता काव्यस्य या निर्झरी।
नाऽन्तर्वृत्तितयाऽप्यसौ निपुणता लोकाद्यवेक्षाकरी॥
काव्यानामनुशीलनेन महिता नो हन्त! सा चातुरी।
हेतुः संविदहोऽस्ति काव्यरचने याऽनन्तपीडाकरी[४]॥

---

१. कविना कालिदासेन। २. जाकर जेहि पर सत्य सनेहू, सो तेहि मिलइ न कुछु सन्देहू, इति वदता गोस्वामितुलसीदासेन। ३. कालिदासोक्तं, तुलसीदासोक्तञ्च।

मा भूत् सच्चरितैर्जनैर्गुणमयैरेषाऽभ्युपेता मही ।
मा भूत् प्रेम च तैः समं सुमनसामस्मद्विधानां क्वचित् ॥
प्रेम प्राज्यमये ! भवेन्न भवताद् भङ्गो मनोभङ्गकृत् ।
भङ्गो वाऽस्तु विखण्डितञ्च नचिरं तज्जीवनं जीर्यताम् ॥

संयोगादितया[५] तनोत्यतनु यद्योगे भृशं लोभनम् ।
नान्तं[६] रूपमुपेत्य नान्तमपि यत्तन्तन्यते तोदनम् ॥
तत् प्रेम प्रचुरायते मनसि नो मेमीयते मानसम् ।
धिक्तद् धिङ्मदनं भवन्तमपि धिग् धिङ्मानसं मे रतम् ॥

♦♦♦♦♦

---

४. मम्मटोक्तस्य हेतुत्रयस्याभावेऽपि यल्लिख्यते मया, तस्य हेतुर्मेऽनन्तपीडाकरी संविदेवेति चतुर्थो हेतुः काव्यस्य कल्प्यः किम् ?

५. प्रेमन्शब्दस्य रचना संयोगादिनकारान्ता वर्तते। संयोगादित्वेनैवानेन परसंयोगविषयको लोभो जन्यते मनसि। नान्तत्वेन च तज्जनितं तोदनं (पीडनं) नान्तं भवति। नान्तत्वञ्च न विद्यतेऽन्तो यस्य तथाभूतम्।

अग्निशिखा

इयमग्निशिखा ज्वलिता सहसैव कथं हृदये ।
निशितैस्तव दृष्टिशरैःसकलं शकलीक्रियते ॥ निशितैस्तव० ॥

रमणीयगुणैर्ग्रथिते रमणे रभसाऽभिरते ।
अवधीर्य समीरणरयमिदमद्य मनो व्यथते ॥

प्रग्रहहीना वृत्तिर्वैलक्ष्यमयं हृदयम् ।
असुधारणमपि कठिनं प्रतिभाति मदीयमते ॥ निशितैस्तव० ॥

भूषितभाषितमहिता रुचिता मदनोपमिता ।
मधुराकृतिरेत्य मनोऽमितमोदैर्मोहयते ॥ निशितैस्तव० ॥

प्रीतौ न भवेद् रीतिः प्रीतौ न भवेन्नीतिः ।
सीम्नैव कथं निखिलं प्रतिबद्धमिदं मनुषे ॥ निशितैस्तव० ॥

लोके किल वह्निशिखा ज्वलयति निखिलं निकरम् ।
अनया शिखया किमहो ! विपरीतमिदङ्क्रियते ॥ निशितैस्तव० ॥

संदम्य मनोभावं गलिताधिरहं जाता
ज्वलनो ह्यतिजवनयुतो ज्वलितं ननु जीवयते ॥ निशितैस्तव० ॥

◆◆◆◆◆◆◆

तव नामाक्षराणि !

तव नवलनामाक्षराणि निःश्वसितविनिगुम्फितानि।
हंस कलरणितानि तानि श्रुतिपथे विनिवेशितानि॥
तव नवलनामाक्षराणि॥
राधितोऽसि सरागमनसा रागसागरगाहने त्वम्।
अतलजलकुलकलितहृदि मे त्वां कथं विनिवेशयानि॥
तव नवलनामाक्षराणि॥
जेतुमभिलषितो मया विविधैरुपायैः किं सदा त्वम् ?
तव हृदयकुहराणि तानि यन्मया नहि गुञ्जितानि॥
तव नवलनामाक्षराणि॥
तरलितोऽसि नतोऽसि नो किं यियतिषाकुलिते मनसि मे।
मम मनःकषितानि तानि कथमहं प्रिय! जिगदिषाणि॥
तव नवलनामाक्षराणि॥
मिहिर इव ते दीप्तिरपि मिहिकानिभं मम धैर्यराशिम्।
द्रुतमपाकुरुते तथापि गिरा कथं समुदीरयाणि॥
तव नवलनामाक्षराणि॥
श्रन्थते नो मे मनो रमते च नो विरमति च नो किम्?
शोकवनिकायितमनसि दोलाकुलानि विनिर्मितानि॥
तव नवलनामाक्षराणि॥
त्वत्सुगन्धसुगन्धितानि मम हृदयकुसुमानि तानि।
मानसे कठिने त्वदीये कथमहं विनियोजयानि॥
तव नवलनामाक्षराणि॥
हृदयसागरघनतरङ्गविलङ्घने प्रिय ! पारये नो ।
जीवने विषमायितानि पारितानि नु कतिविधानि
तव नवलनामाक्षराणि॥
मीन इव मे जीवनं जलमन्तरेण न जीव्यते प्रिय!
निर्मलाम्भसि तव मनसि धवलायिते कथमिव विशानि॥
तव नवलनामाक्षराणि॥

गुरुजनैरनुशासितानि सञ्चितानि सुभाषितानि
नलिनदलसंहतिगलितकिञ्जल्क इव गलितानि तानि
तव नवलनामाक्षराणि ॥
लास्यलीलानटनपटुना मम मनसि विनिलीय निभृतम्
वेपितानि मनोगृहाणि किं कृतानि निकेतनानि
तव नवलनामाक्षराणि ॥

♦♦♦♦♦

तव वीतदये हृदये

विनिवेदितमद्य मया हृदयं मदनाग्निसमक्षमिदं सदयं
न तथापि गृहीतमिदं भवताऽनुमता भवतो भविताऽस्मि कथम्?

मधुसारयुतं भवतो वचनं कुसुमायुधसाम्ययुतं वदनं
विषमायितमत्यधिकं कठिनं निशितं हृदयं कुलिशेन कृतम्॥

मृदुचापयुतेन कृतं मदनेन मनो हि मनोजनिषङ्ग इदं
घननीलिमनीलदृशा भवता महितेन हितेन न साधु कृतम्॥

मम देहलताऽनुगता कृशतामनुतापकरं हतचित्तमिदं
विरहानलभारमवाप्य मनो गुरुभारयुतं तनुतोऽप्यधिकम्॥

अविषह्यमिमं मम शोकमये! ददता भवता न समीक्ष्य कृतं
ननु जीवितमेव मतोऽसि मया दयया परिरक्ष विनीतजनम्॥

मम निश्चलशुभ्रजले हृदये तव रूपमिदं प्रतिबिम्बयुतं
मलिने मुकुरे भवतो हृदये मम रूपमिदन्नहि सङ्क्रमितम्

शरदिन्दुनिभे शिशिरे हृदयेऽपि कृशानुशिखा शलते सुचिरं
गलदश्रुजलं समवाप्य तया नतया ननु धूमकुलं जनितम्॥

अपराऽनुरतं भवतो हृदयं विदितं न तथापि मनो विरतं
प्रियतामुपयामि कथं प्रिय ते ननु वीतदये हृदयेऽहमियम्॥

♦♦♦♦♦

यापितं न मनोऽपि शम्

समधिगम्य मनस्त्वदीयं सघनतरुवरसन्निभम्।
आतपाकुलितेन मनसा त्वन्मनस्तरसा श्रितम्॥

संश्रये छायामये किमु धावितं मनसा भृशम्।
नाऽप्यवाप्ता शिशिरता सा यापितन्न मनोऽपि शम्॥

त्वमसि सिन्धुरुदारताया नास्ति दोषः कोऽपि ते।
एतदपि संभाव्यते मम दुष्टदैवविजृम्भितम्॥

प्रेक्ष्य तव लावण्यमेषा धीरताऽप्यवधीरिता।
कल्पितोऽसि मया तदैव मनोरथैकधरापदम्॥

अतितुमुलसङ्गरकरं वैकल्यमयहृदयं मम।
याति नो शैथिल्यवृत्तिं तव विरहशरभेदितम्॥

किं नमितनयनेन ननु निरवेशि नवरूपं मया।
येन जागरिता पिपासा दर्शने प्रिय! पुनरियम्॥

नीलनीरदनिचयपीनतमोऽनुकारिणि मानसे।
भ्राजितं क्षणमात्रमेव सुभग! सुधाकलिताननम्॥

क्वापि नो स्थिरतामुपैत्यतिचञ्चलं चपलाकुलम्।
किं तथापि हताशया पुनरपि विलोकनमीप्सितम्॥

विषमसायक! वृत्तिरपि ते त्वादृशी विषमायिता।
यदुभयोर्मनसोस्त्वया किं पातिता न शराः समम्॥

शितशरैस्तु शरव्यतामहमेव किं समुपागता।
ज्ञास्यते रमणेन मे खलु मानसोत्कलिका कथम्॥

◆◆◆◆◆◆◆◆◆

नगेशशृङ्ग एष पातितः कथम्

उन्नतो नगेशशृङ्ग एष पातितः कथं
चन्द्रसारशीलतोऽनिलोऽपि तापितः कथम् ॥

आगमस्तवाभवन्मदीयमानसे यदा
नूतनैव चेतना समाहृता मया कथम् ॥

अध्वना पुरातनेन सञ्चरद् व्यथाकुलं
नव्यमार्गशोधने मनः प्रवर्तते कथम् ॥

बाधनं सहस्रधा नवीनवर्त्मसंयुतं
ज्ञायते तथापि रे ! विराममेति नो कथम् ॥

प्रागभिप्रवृत्य नैव किं पराञ्चते मनो
धृष्टता प्रदर्श्यते नु मानसेन मे कथम् ॥

सृष्टिवीक्षणे मदीयदृष्टिरीदृशी कदा
यादृशी गुणाऽनुवर्णनेन तेऽभवद् द्रुतम् ॥

नामधेयमप्यदः प्रहर्षणं करोति ते
दर्शनं सुखावहं गिराऽनुवर्ण्यते कथम् ॥

दर्शनं गिरामतीत्य वर्तते यदा हि ते
भाषणं सुधाऽभिवर्षणं करोत्यनारतम् ॥

भाषणामृतेन जीव्यते हता जिजीविषा
जीवनस्य सारतामुपैति सङ्गमो ध्रुवम् ॥

♦♦♦♦♦♦♦♦♦

सैव वीथी

वीथिका सा वृथा त्वं न लब्धो यया
सैव वीथी यया त्वन्मनो गम्यते।
सैव वीथी यया त्वन्मनो गम्यते ।।
रूपजातं भवेच्छ्लाघनीयं जनै-
र्व्यर्थमेतद्धि नो त्वन्मनो जीयते
सैव वीथी यया त्वन्मनो गम्यते ।।
वाग्भवेद् वैदुषीसंयुता शोभना
सा वृथा नो यया त्वद्गुणो गीयते
सैव वीथी यया त्वन्मनो गम्यते ।।
सर्वथापार्थकं भूषणानां कुलं
भूषणं तद् वरं यद्धि ते रोचते
सैव वीथी यया त्वन्मनो गम्यते ।।
श्रूयतेऽयं वसन्तोऽनुयातोऽधुना
त्वद्विना मे मनो हन्त नो मोदते।।
सैव वीथी यया त्वन्मनो गम्यते ।।
वाटिका पुष्पिता सौरभैः संयुता
भृङ्गसङ्गं विना नैव सा शोभते
सैव वीथी यया त्वन्मनो गम्यते ।।
पुष्पमेतन्न हृद्वल्लरीसंयुतं
वृन्तलग्नेन नानेन किं शीर्यते
सैव वीथी यया त्वन्मनो गम्यते ।।

◆◆◆◆◆◆◆◆◆

मम वामनवृत्तिरियम्

अवलोक्योन्नततरुफलमिदमाकुलितं हृदयम्।
उपहासपदं गमिता मम वामनवृत्तिरियम्।।

तेजोभिरयं तपनो नुदते तिमिरस्य ततिम्।
तमवाप्तुमिदं हतकं यतते हृदयं तरलम्।।

अम्भोधिगभीरत्वं किमु नास्ति मया विदितम्।
अवगाहितुमद्य मया तरसैव पदं निहितम्।।

पवनं प्रतिबन्धुमये प्रभवति को धरणितले ।
पाटवहीनाऽहमहोऽभिलषामि जवनदमनम्।।

विरहे जननिकुरम्बं प्रतिभाति विपिनसदृशं
विपिनं विभवैर्वलितं वल्लभ तव सङ्गयुतम्।।

दयया हीनोऽसि तदपि हृदयन्तु यियाचिषते ।
मन्दस्मितविकसितमुखमिदमिन्दुकलाकलितम्।।

मुकुलितनियतिर्निटिलः कान्तारपथः कुटिलः।
कामयमाना कमनीयनिरतिशयसुखमहितम्।।

◆◆◆◆◆

विप्रलम्भ एव शिष्यते

प्रीतिमञ्जरीरसं निपीय यो न मोदते ।
किं समायुतं मनोऽतिनिर्दये तथाविधे।।
किं समायुतं मनोऽतिनिर्दये तथाविधे।।
खिद्यमानमानसोऽतितिक्तनिम्बसेवया।
स्नेहधारया मयाऽभिषेचितोऽपि गर्हते।।
किं समायुतं मनोऽतिनिर्दये तथाविधे॥
येन यापितं वयोऽनुरूपसङ्गिनीकृते।
मादृशे समर्पिते जनेऽपि नाऽनुरज्यते
किं समायुतं मनोऽतिनिर्दये तथाविधे॥
जन्मता कृतार्थतामुपैति यस्य दर्शने ।
दर्शनप्रदानमप्यनुग्रहाय मन्यते
किं समायुतं मनोऽतिनिर्दये तथाविधे॥
चेतनाविहीनमप्युपैति चेतनामहो।
विप्रयोगसंस्थितं मनोऽपि मे युयुक्षते
किं समायुतं मनोऽतिनिर्दये तथाविधे॥
सर्वथा धिगस्तु तं विधिं विधानकारिणं ।
येन वज्रधारया विनिर्मितं मनो हि ते
किं समायुतं मनोऽतिनिर्दये तथाविधे॥
यस्तु सौख्यमप्युपेक्षते यशोऽभिलिप्सया।
वेत्ति नो धराऽधरा मनोनिबन्धनादृते
किं समायुतं मनोऽतिनिर्दये तथाविधे॥
हन्त ! येन रञ्जिते हृदि प्रकल्पितं छलं
भावबन्धने निसर्गजेऽपि यो विशङ्कते
किं समायुतं मनोऽतिनिर्दये तथाविधे॥
स्थायिभावयूथमप्युपद्रुतं द्रुतं कथं
यस्य शोचनेन विप्रलम्भ एव शिष्यते
किं समायुतं मनोऽतिनिर्दये तथाविधे॥

◆◆◆◆◆

कीदृशं परिवर्तनम्

अनभिलषितं बन्धनं मे तदपि जातं रुचिकरम्।
कीदृशं परिवर्तनम्मे मानसेऽतिसुखावहम्॥

भूरि सहचरितं यया सा पीडयत्येकाकिता।
किं मनः काङ्क्षति मदीयं भुजयुगलविनिपीडनम्

अयि! कठोरतमेऽपि तल्पे यास्ति सुलभा सा गता।
निद्रया हतयाऽभ्युपेता नो भवेयं क्वचिदहम्

अतिसुकोमलकुसुमशयनं मे कथङ्कुलिशायते।
निर्गताऽस्ति निमेषवृत्तिरियन्नयनमार्गात्कथम्?

अयि! कथं तूलोपधानमुपैति कण्टकतीक्ष्णताम्।
शयितुमिच्छति मे मनस्तव पीनवक्षसि किं चिरम् ?

परिसमाप्तममन्दसुखवृन्दं मदीयं त्वयि कथम् ?
हारितं हृदयं मयेदं नो लभे प्रिय! सुखमहम्

♦♦♦♦♦

अहमेव किन्न निदर्शनम्

स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया।
तेनैव नीरसवल्लिका मे मानसी सरसायिता
स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया॥
तीव्रभ्रमिभ्रमितेन तेन नतेन मृदुहृदयेन मे।
तव गुणजलधिरवगाहितो रत्नोच्चयेषु तृषा कृता
स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया॥
शोभनगुणानां ग्राहकं मादृशमवेक्ष्य नु किन्त्वया ?
भुवनेषु कीर्तिमवापिता गुणराशयः संछादिताः
स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया॥
गुणलुब्धकन्तु मया समं समवाप्य केन विचार्यते।
प्रियतम! तथापि विचारणा हृदये निधातुं किं कृता ?
स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया॥
आह्लादिनस्तव मृदुगुणास्तुहिनेन सदृशं शीतलाः।
ननु तेऽपि मम विरहातुरेऽस्मिन् मानसे प्रखरायिताः॥
स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया॥
हेतुं विनैव शठेन विधिना तव करे विनिपातिता।
दैवाऽनुषङ्गमवाप्य मे करुणाऽपि ते प्रपलायिता॥
स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया॥
कन्दर्पदाहोद्दीपिते हृदये किमपि नो भासते ।
स्तम्भे धृता करिणीव मे मनसो दशा विकलायिता॥
स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया॥
यासां न दृष्टिमुपागतोऽसि सुखाऽन्विता ललना हि ताः।
अहमेव किन्न निदर्शनं तव दृष्टिपातजडीकृता॥
स्नेहेन संवलितं मितं यदुदीरितं वचनन्त्वया॥

◆◆◆◆◆

लब्धं न रत्नमेकम्

रत्नाकरेऽपि मथिते लब्धं न रत्नमेकम्।
अन्वेषिता धरेयं नैवाऽवलोकितस्त्वम्॥
रत्नाकरेऽपि मथिते लब्धं न रत्नमेकम्॥
विधुना सुसङ्गतेयं राका भवेत्सनाथा।
विधुरपि तयाऽभिरन्तुं मासन्नु तप्यतेऽयम्॥
रत्नाकरेऽपि मथिते लब्धं न रत्नमेकम्॥
रविणा युता कमलिनी सुरभीकरोति सकलम्।
रविरपि तदीययोगं प्राप्तुं समुद्यतोऽयम्॥
रत्नाकरेऽपि मथिते लब्धं न रत्नमेकम्॥
उभयाऽनुरञ्जनेन लोको भवेत् स्थिरोऽयम्।
अयि! पाक्षिकेऽनुरागे हृदये भवेन्न धैर्यम्॥
रत्नाकरेऽपि मथिते लब्धं न रत्नमेकम्॥
अयि! किं वने वनेऽपि कलिकाकुलं विपन्नम्।
प्रीतिं न तु द्विरेफे दृष्ट्वा मनोऽतिखिन्नम्
रत्नाकरेऽपि मथिते लब्धं न रत्नमेकम्॥
सङ्गं यदीयमाप्तुं जन्मानि यापितानि।
नैष्ठुर्यमस्य वाचा शक्नोमि नैव वक्तुम्॥
रत्नाकरेऽपि मथिते लब्धं न रत्नमेकम्॥
चेतुं खपुष्पमेतन् मे चित्तमाकुलं किम्?
मूलं विना क्व वल्ली वल्लीं विना क्व पुष्पम्?
रत्नाकरेऽपि मथिते लब्धं न रत्नमेकम्॥

◆◆◆◆◆

व्यर्थं वयो भवता विना

शोकानलेन्धनताङ्गता: प्राणास्सुभग! भवता विना।
अभिभाविता तेनैव धीर्धूमायिता भवता विना॥
शोकानलेन्धनताङ्गता: प्राणा: सुभग! भवता विना॥
सकलसुखसञ्चयकरी सौभाग्यसरसा शर्वरी।
सा यामिनी यमयामिनी नो नीयते भवता विना॥
शोकानलेन्धनताङ्गता: प्राणा: सुभग! भवता विना॥
क्षीणेषु भावचयेषु कथमहमहमिका जनिता हि मे।
चिरशान्तिमुपगमिता: सततमिह कान्त! ये भवता विना॥
शोकानलेन्धनताङ्गता: प्राणा: सुभग! भवता विना॥
शातनं व्यसनोपपतनं निष्करुणनियतेर्निपतनम्।
किं समेत्य समाद्रवन्ति भृशं दयित! भवता विना॥
शोकानलेन्धनताङ्गता: प्राणा: सुभग! भवता विना॥
धवलधूलिकषायिता शशधरविरहमुकुलीकृता।
सेयं कुमुदिनी दिशति मे व्यर्थं वयो भवता विना॥
शोकानलेन्धनताङ्गता: प्राणा: सुभग! भवता विना॥
अवलम्बहीनं निस्सुखं निष्फलमिदं मे जीवनम्।
अयि! निष्प्रयोजनमस्ति निखिलं मे रमण! भवता विना॥
शोकानलेन्धनताङ्गता: प्राणा: सुभग! भवता विना॥
एकाकृति: प्रतिभासते सुखसङ्गलोलुपमानसे।
धिग्जीवनं यज्जीव्यते क्षणमात्रमपि भवता विना॥
शोकानलेन्धनताङ्गता: प्राणा: सुभग! भवता विना॥

♦♦♦♦♦

दर्शनं स्वप्नेऽपि नो दत्तन्त्वया

निर्निमेषं यामिनी गमिता मया।
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

चिन्त्यतेऽहनि चेतसा चिन्ताकुलं
जायते निशि निशि हि तत् स्वप्नायितम्।
यापितं तव चिन्तनेन दिनम्मया
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

त्वां विना नहि कोऽप्यहो! धरणीतले
येन मे विषमव्यथा ह्यपनीयते ।
अनुनये त्वामयि ! मुकुलिताञ्जलियुता
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

लालसायुतमानसं विमनायते
शोकशङ्कुरयं भृशं निशितायते।
इयमयोमयसायकैर्गलपितायिता
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

तव कुमुमसायकसनाभिसुचारुता
अगणितोपायैर्न विस्मरणङ्गता।
मन्मथोन्मथनैरियन्नु कदर्थिता
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

प्रग्रहा मनसस्स्खलनमुपयान्ति मे
कीदृशी कल्लोलिनी क्लिश्नाति मे ।
अश्रुभिर्मे वृष्टिरपि निर्भर्त्सिता
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

स्फुरदरुणकेसरकरालकदम्बकं
कुसुमकिञ्जल्कैर्युतं मधुकरकुलम्।

समवलोक्य द्रुतङ्गता मे धीरता
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

माधवीमण्डपनतं लतिकाकुलं
मन्दमारुतकम्पितं नवचम्पकम्।
तापयन्ति शितन्न किं दृष्टन्त्वया
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

अयि! रमण! मरणं शरणमेवाऽस्ति मे
शशिकिरणनीकाशशुचिवदनादृते।
किमशरण्या कारिता निर्घृणतया
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

निर्निमेषं यामिनी गमिता मया।
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया॥

♦♦♦♦♦♦♦♦♦

परितोषोऽद्य धरामधिशेते किम्मे?

येनालङ्कृतमद्यावधि हृदयम्मे
परितोषोऽद्यधरामधिशेते किम्मे॥
परितोषोऽद्य धरामधिशेते किम्मे॥

जातो भुवि नहि कोऽपि मनस्सदृशो मे
बन्धो येन समुपजनिता मनसो मे॥
परितोषोऽद्य धरामधिशेते किम्मे॥

सङ्गहीनमिदमितं वयो निखिलम्मे
खेदं तेन कदापि गतन्न मनो मे॥
परितोषोऽद्य धरामधिशेते किम्मे॥

नयनसम्मुखं समागते त्वयि सहसा
वात्याचक्रमिदं चेतसि जनितम्मे॥
परितोषोऽद्य धरामधिशेते किम्मे॥

लब्धुं त्वां धावति चेतो गतिशीलं
पाशैः कैर्भवितासि वशङ्गमितो मे॥
परितोषोऽद्य धरामधिशेते किम्मे॥

चिरसञ्चितमिदमवधारणमपगमितं
त्वन्मयमये! जगत्प्रतिभाति कथम्मे॥
परितोषोऽद्य धरामधिशेते किम्मे॥

स्नेहसिन्धुरयमद्यावधि परिषुप्तो
जागरिते तस्मिन् मज्जति हृदयं मे ॥
परितोषोऽद्य धरामधिशेते किम्मे॥

रूपराशिरयमद्य मया दृष्टस्ते
अवलम्बनमिदमेकमेव कलितं मे ॥
परितोषोऽद्य धरामधिशेते किम्मे॥

लक्ष्यमेकमवधारितमिदं मया किं
तव हृदये लभ्येत कथं वासो मे ॥
परितोषोऽद्य धरामधिशेते किम्मे॥

शुष्कमिदं भवनं सततं प्रतिभातं
त्वयि दृष्टे हरितिम्ना युक्तमिदं मे ॥
परितोषोऽद्य धरामधिशेते किम्मे ॥
यया कदापि विमथितं नो मम हृदयं
सैव जलदमाला हृदयं व्यथयति मे ॥
परितोषोऽद्य धरामधिशेते किम्मे ॥
स्नुता येन शिशिरैव सदा हिमधारा
चन्द्रस्सोऽपि वमति गरलं प्रचुरम्भे ॥
परितोषोऽद्य धरामधिशेते किम्मे ॥

♦♦♦♦♦

जाता विचित्रतेयम्

मधुराकृतिस्त्वदीया कलिता यदा गुणेन
जाता विचित्रतेयं दाहस्तु चन्दनेन॥
जाता विचित्रतेयं दाहस्तु चन्दनेन॥
रूपश्रिया समुदितो वाणीविलासमुदितो
हतभाग्यता भृशं मे तृषिताऽस्मि दर्शनेन॥
जाता विचित्रतेयं दाहस्तु चन्दनेन॥
गुणराशिना युतेन बद्धं त्वया मनो मे
शक्यो मया न बन्धुं मनसाऽतिनिर्गुणेन॥
जाता विचित्रतेयं दाहस्तु चन्दनेन॥
अयि! ते विशालहृदये पूरोऽस्ति रागसिन्धोः
कृपणोऽसि बिन्दुरपि नो दत्तोऽतिनिर्दयेन॥
जाता विचित्रतेयं दाहस्तु चन्दनेन॥
अभिभाविताऽस्मि यदहं तेजोगुणैस्त्वदीयैर्-
ननु पीडयन् मनो मे दृप्तोऽसि किं मदेन॥
जाता विचित्रतेयं दाहस्तु चन्दनेन॥
रागो निबद्धमूलो मे त्वयि कथन्नु सहसा।
अवहेलना कृतेयं छलिता त्वया मिषेण॥
जाता विचित्रतेयं दाहस्तु चन्दनेन॥
जानाति योऽवमन्तुं भावोदयं विहन्तुम्।
अयि! मे हते दुराशे! संश्लेषमेषि केन ?
जाता विचित्रतेयं दाहस्तु चन्दनेन॥

◆◆◆◆◆

पाशसन्दाने समीहा

प्रेममदमुकुलितनयनयो राजसे किमनारतम् ?
चपलता मनसोद्गता क्षणमपि न विरमति मे कथम्॥
प्रेममदमुकुलितनयनयो राजसे किमनारतम् ?
न श्रुता नोत्प्रेक्षिता नैवाऽनुभूतेयं स्वता।
यादृशी जनिता मनसि समुपेत्य तव दर्शनपथम्॥
प्रेममदमुकुलितनयनयो राजसे किमनारतम् ?
किं स्वतासदृशं समं न समाचरितमधुना त्वया।
नोचिता तव वृत्तिरेषा पीडयति या मानसम्॥
प्रेममदमुकुलितनयनयो राजसे किमनारतम् ?
बहुलपक्षे क्षीयमाणा शशिकलाऽपि विवर्धते।
वर्धते निर्ममनसि ते संस्थितिर्मे नो कथम्॥
प्रेममदमुकुलितनयनयो राजसे किमनारतम् ?
सततवितता तव विरसता किं मया न समधिगता ?
पाशसन्दाने समीहा वर्धते नु तथापि किम्॥
प्रेममदमुकुलितनयनयो राजसे किमनारतम् ?
किं मया परिमार्गणे ते यापितं निखिलं वयो
यद् ददासि न निर्घृण त्वं! याचनेऽपि न मे क्षणम्॥
प्रेममदमुकुलितनयनयो राजसे किमनारतम् ?
अयि! तथाभवितव्यतावशतामहं समुपागता।
नो मनो विनियम्यते यमितेऽपि सततं मे हतम्॥
प्रेममदमुकुलितनयनयो राजसे किमनारतम् ?

◆◆◆◆◆

रोचते नैव किञ्चित्

रोचते नैव किञ्चिज्जने नो वने।
अद्य जातोऽभिलाषो भवद्दर्शने॥

वस्तुतो राजते सङ्कुलं यज्जगत्।
शून्यतापन्नमाभाति मे दर्शने॥

सृष्टिरेषा भवेन्मा भवेद् यातु वा।
किं निबद्धं मनो मे भवद्दर्शने॥

जीवनं भूरि नीतं विना केनचित्।
आश्रयेच्छा कथं मे भवद्दर्शने॥

यद् भवन्तं विना लभ्यते नो सुखम्।
कीदृशं जातमेतन्मनो दर्शने॥

व्यर्थमेषा जनिर्मे भवन्तं विना।
जीवनं मे गतं तत्त्वसंशोधने॥

निर्गुणं यत्स्वरूपं मया पूजितम्।
किं गुणीभूतमेतद् भवद्दर्शने॥

कीदृशं मादकन्ते स्वरूपं शुभम्।
धिक्कृतश्शोभिवर्गो भवद्दर्शने॥

चित्तचाञ्चल्यहीनं प्रवृत्तं सदा।
अद्य जातं चलं किं मनो दर्शने॥

मानसे कोऽपि नो मे निबद्धः कवचिद्-
रज्जुहीनं मनो बन्धितं दर्शने॥

अम्बुवाहेन तुल्यो ध्वनिर्यच्छ्रुतस्-
तन्मनो मे मयूरो रतो नर्तने॥

यद् विधानं सदा जीवने मेऽभवत्।
तद् विधानं विनष्टं भवद्दर्शने॥

याऽनुभूतिर्धृता पूर्णतासंयुता।
साऽनुभूतिर्विनष्टा भवद्दर्शने॥

पूर्णता नैव लोके भवन्तं विना।
भावना कीदृशीयं भवद्दर्शने॥

सैव सृष्टिस्तु सैवाऽनवद्या गतिर्-
नूतनोऽयं प्रमादो भद्दर्शने॥

धीरता या सदा जीवने मे रता।
सा गता धीरता मे भवद्दर्शने॥

धारितं पालितं वीक्षितं चिन्तितम्।
तत्तु सर्वं विनष्टं भवद्दर्शने॥

मानसे राजतां तावकीनाकृतिः।
साऽवशिष्टा पिपासा भवद्दर्शने॥

◆◆◆◆◆

व्यथितं मनो न निवार्यते

श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते।
तव गुणचयोऽनुपमो हि मे शून्ये मनस्यवतार्यते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥
अतिभूमिमुपयाते क्षुभितचेतसि वसन्नधिराजसे।
निष्पन्दशून्यशरीरकं कथमिन्द्रियैर्विजिहास्यते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥
क्व गतं सकलशास्त्रामृतं क्व नु चिन्तितं तपसा युतम्।
क्व गता विमोक्षसरणिरसौ केनापि सकलं हार्यते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥
आशैशवान्मे धीरता बुधजनकुलैः स्पृहणीयता।
स्खलितं नवीनमिदं कथं हृदयन्तु येन विकार्यते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥
नलिनीदलो निशितायते मलयजरसोऽप्यनलायते।
तुलनामनारोपितमिदं तपनं न मे शिशिरायते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥
प्रबलो रजःप्रसरो धियं कलुषीकरोति कथं भृशं।
ज्योत्स्नाऽनुयाति घनाऽन्धकारमये! कथं प्रतिसार्यते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥
विषवेगविषमैः सायकैरनुवेधिता सकला तनुः।
प्रतिरोमकूपमवाप्य हतमदनेन किं न विचार्यते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥
हरहाससितमन्दस्मितैराकर्षितं हृदयं मम।
तेनैव सह शान्तिर्गता किं किं न भवता कार्यते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥
मदकलकलैः कोलाहलैः परितो जयध्वनिरुच्यते।
ननु कीदृशोऽभिभवोऽभवन् नहि जीवनं मे धार्यते॥
श्रुतमपगतं निखिलं कथं व्यथितं मनो न निवार्यते॥

♦♦♦♦♦

अयमेव मेऽपराधः

अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
स्नेहस्फुलिङ्ग एष ज्वलितो नु मानसे किम् ?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
कणसन्निभेन तेन दाहो न जन्यतेऽयम्।
स्नेहस्य मारुतेन संधुक्षितस्त्वया किम्?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
संदीपिताग्निना मे क्षारीकृतो विवेको।
देहो न दह्यते किं क्वथते च मानसं किम् ?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
आजन्मनस्तु हृदये बीजं प्रसुप्तमासीत्।
त्वत्स्नेहवारिणैव तरसा द्रुमायितं किम् ?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
अयि! कीदृशी विधेयं स्नेहस्य दर्शिता मे।
व्यामोहशोषखेदैः सततं विबाधिता किम् ?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
चिन्ताशतैर्धृतेयं वाणी प्रवर्तते नो।
सरितः प्रपात इव मे दृष्टिस्त्वया कृता किम् ?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
दुःखप्रकर्षममितं सोढुं घृतं शरीरम्।
तव दर्शनाशया मे प्राणैर्न मुच्यते किम् ?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
क्षणमात्रमेव हृदये निहिता समादरेण।
मध्येपथं त्वयाऽहं रभसाऽपहस्तिता किम् ?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?
विजनासु वीथिकासु भ्रमताकुलेन मनसा।
स्वीयं हतं ललाटं सहसैव विस्मृतं किम् ?
अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ?

♦♦♦♦♦

स्ववशता सा कथं वीता

सुभग! सुकुमारतेयन्ते कथं मे भाति विपरीता।
अशनिघातोपघातैर्मे कथं गम्भीरता नीता॥

सुभग! सुकुमारतेयन्ते कथं मे भाति विपरीता॥

प्रवृत्तं यन्मनो मथितुं कथञ्चिन्नोत्सहे वदितुम्।
स्वसंवेद्याऽविषह्येयमनाख्येया व्यथा जनिता॥

सुभग! सुकुमारतेयन्ते कथं मे भाति विपरीता॥

मदनदुष्चेष्टितेनैव दशा मे दुर्निवारेयम्।
मनसि या साऽवकाशासीत् स्ववशता सा कथं वीता॥

सुभग! सुकुमारतेयन्ते कथं मे भाति विपरीता॥

मनो मे नीयते रभसाऽन्तिकन्ते केन नो जाने।
क्षणं संप्रेक्ष्य ते रूपं धरा निखिलैव विपरीता॥

सुभग! सुकुमारतेयन्ते कथं मे भाति विपरीता॥

अये! संजीवनालायं स्वरूपन्ते सुधासारम्।
हतं भाग्यं मदीयं येन विषधारा सदा पीता॥

सुभग! सुकुमारतेयन्ते कथं मे भाति विपरीता॥

मनसि मे त्वं वचसि मे त्वं क्रियानिकरेष्वपि त्वं मे।
स्वदेहे संस्थिता यदहन्तु परकीयाऽस्मि संवृत्ता॥

सुभग! सुकुमारतेयन्ते कथं मे भाति विपरीता॥

कृता नो याचना क्वापि तथापि त्वामहं याचे।
न धारयितुं समर्थाऽस्मि यदा प्राणास्त्वया क्रीता:॥

सुभग! सुकुमारतेयन्ते कथं मे भाति विपरीता॥

♦♦♦♦♦

कोणमेकं देहि मे

प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे।
प्रापणं तव हृदि भवेन्नु तदेव वर्त्म विधेहि मे ॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥
कृष्यते हृदयं यया नहि चारुता मे त्वादृशी।
पङ्गुना गिरिरोहणं क्रियतां कथं त्वं ब्रूहि मे॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥
धृष्यते बुधजनसमूहो वाग्मिता नो त्वादृशी।
उडुगणैः किमु हन्यते नैशाऽन्धकारो ब्रूहि मे॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥
मोह्यते निखिलं जगन्नहि वैदुषी मे त्वादृशी।
नौकया जलधेः प्रतरणं शक्यते किं ब्रूहि मे ॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥
मृद्यते हृदयं झटिति नहि चातुरी मे त्वादृशी।
किं कृते प्रिय! तेऽनुरागो लभ्यते त्वं ब्रूहि मे॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥
हृष्यते मनसा भृशं प्रकृतिर्न रुचिरा त्वादृशी।
तीर्यते न पिपीलिकाभिर्जाह्नवी त्वं ब्रूहि मे॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥
कामये तव हृदि निवासं हस्यते सकलैर्जनैः।
अयि! विशालतमेऽपि हृदये कोणमेकं देहि मे॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥
प्राप्स्यते हृदये पदं कथमपि मया यदि निर्मले।
निर्धनो धनदो भवेत् प्रिय! का क्षतिस्ते ब्रूहि मे॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥

◆◆◆◆◆

इयती करुणा न त्वया कृता

मम नयेनपथेन समाविशता
इयती करुणा न त्वया कृता॥

स्फटिकोपलविशदविपुलविमले
या शान्तिरभूद् हृदये धवले।
सा शान्तिरसौ मे प्रोन्मथिता
इयती करुणा न त्वया कृता॥

ज्ञातं सकलं प्रज्ञासहितं
तज्ज्ञानमिदं निखिलं पिहितम्।
सा बुद्धिरसौ मे जडीकृता
इयती करुणा न त्वया कृता॥

मम चित्तवृत्तिनाशनं कृतं
हृद्यतिघनतरं तमो जनितम्।
स्थितिरपि निभृतं मानसे धृता
इयती करुणा न त्वया कृता॥

घनतरा याऽस्ति मानसी सरित्
विचलिता न याऽद्यावधि क्वचित्।
तव दृष्ट्याऽसौ द्रुतिमुपागता
इयती करुणा न त्वया कृता॥

या वृत्तिरभूज्जगतो विरता
विषमे कालेऽपि न सञ्चलिता।
सा वृत्तिरसौ मे चलीकृता
इयती करुणा न त्वया कृता॥

नेदृशी चारुता क्वचिच्छ्रुता
न्यक्कृता जनाश्चारुतायुताः।
अयि! कथमिव मे धीरता हृता
इयती करुणा न त्वया कृता॥

सम्भाषणहीनं यद्घटितं
तन्मनो पीडयति मे ह्यधिकम्।
वाचामपि वेला नो दत्ता
इयती करुणा न त्वया कृता॥

तव हृदयभावमपि नो जाने
शैथिल्यं भवतु कथं माने।
वाणी मूका मे संप्रहिता
इयती करुणा न त्वया कृता॥

रोचते न किमपि त्वया विना
जीव्यते तदपि यत् त्वया विना।
तव दर्शनाय साधना कृता
इयती करुणा न त्वया कृता॥

♦♦♦♦♦

मानसेन चम्पकायितम्

अद्य भाति मे जगत् सर्वथा विलक्षणं
किं विवर्तिता धरा लक्ष्यते न कारणम्॥

नो रविर्वृषङ्गतो नापि शोषितं सरो
धुक्षितञ्च मानसं किं विना निदाघकम्॥

दृश्यते न खे घनो वेपते मनोऽपि नो
कीदृशो ध्वनिः श्रुतः श्रूयते न मेऽपरम्॥

खे गतन्तु मे मनो नास्ति तत्र निःस्वनो
मुग्धमानसेन मे हन्त! चातकायितम्॥

नास्ति केतकीकुलं वेल्लितं कदम्बकं
कीदृशो घनागमो रोचतेऽद्य मे भृशम्॥

नास्ति मालतीलता नार्जुनच्छविः सिता
फुल्लिता न यूथिका कीदृशञ्च वर्षणम्॥

नृत्यते न केकिभिर्वृष्यते न वारिभिर्-
हृष्यते हृदा मुदा संनिशम्य ते गिरम्॥

कूजितं न हंसकैर्गुञ्जितं न षट्पदै-
र्मानसी शरत्कथं कूजने रता द्रुतम्॥

काशपुष्परेणुभिर्नाचिता शुभा मही
शुभ्रता मनोगता भासिता शरन्निभम्॥

नो नभो हिमायितं नो खगैः पलायितं
कम्पते च मानसं किं विना तुषारकम्॥

शोभनो रसालको दृश्यते न मे पिको
हृद्गतो मधुर्नवो विध्यतीव किं भृशम्॥

नाम्रमञ्जरी नता पुष्पिता न मल्लिका
दूयते च मानसं किं विना वसन्तकम् ॥

किं द्विरेफसङ्गतिः श्रूयतेऽपि चम्पकैर्-
दग्धमानसेन मे किन्नु चम्पकायितम् ॥

◆◆◆◆◆

हृदि काङ्क्षया विगतं वयः

मिलतीति कोऽपि भवत्समो हृदि काङ्क्षया विगतं वयः।
या कामना मनसा कृता विगतं तयैव हतं वयः॥

अयि! चारुता भवता समा सुविचारिताऽपि भवत्समा।
माधुर्यमस्तु भवत्समं हृदि काङ्क्षया विगतं वयः॥

रूपं भवेद् भवता समं दृष्ट्वा नु यद्धतचेतनम्।
जायेत बत रमणीकुलं हृदि काङ्क्षया विगतं वयः॥

अत्युन्नतं तव मानसं हिमगिरिशिखरसमतायुतम्।
गाम्भीर्यमस्तु जलधिसमं हृदि काङ्क्षया विगतं वयः॥

अत्यायतं चरितं नुतं रमणीयकं वलितं शुभम्।
अपरो जनो नहि दृश्यते हृदि काङ्क्षया विगतं वयः॥

अवलोकितञ्च भवत्समं वेविध्यते हृदयं चिरम्।
अद्यापि नो विस्मर्यते हृदि काङ्क्षया विगतं वयः॥

गीतं भवेत्सरसायितं संवेलयति हृदयं परम्।
ध्वनितं मनसि यन्निशि दिनं हृदि काङ्क्षया विगतं वयः॥

वैदुष्यमस्तु समादृतं यन्मीयते भवता समम्।
अन्योपमा नहि विद्यते हृदि काङ्क्षया विगतं वयः॥

मृदुभाषिता भवता समा पीयूषसाररसैर्युता।
अभिषिच्यते श्रुतिवीथिका हृदि काङ्क्षया विगतं वयः॥

वचनन्निशम्य भवेद् भ्रमः पयसां निधिर्ननु तोयदः।
शिखिनो भवन्तु विनन्दिता हृदि काङ्क्षया विगतं वयः॥

हसितं सुचारु भवत्समं गिरिनिर्झरीध्वनिनायुतम्।
कुसुमावपातकरं भृशं हृदि काङ्क्षया विगतं वयः॥

क्षान्तिर्भवेद् भवता समा ह्रियमाप्नुयान्महती क्षमा।
मानोन्नतिर्भवता समा हृदि काङ्क्षया विगतं वयः॥

भवतैव सदृशी धीरता प्रतिबिम्बिता खलु रामता।
शान्तिर्भवेद् भवता समा हृदि काङ्क्षया विगतं वयः॥

हृदि शुभ्रता भवता समा प्रतिभासिताः प्रथिता गुणाः।
अतिमार्दवन्तु भवत्समं हृदि काङ्क्षया विगतं वयः॥

रम्यैर्गुणैस्तु विनिर्मितो दोषाऽनुषङ्गविवर्जितो
गरिमाञ्चितो भवता समो हृदि काङ्क्षया विगतं वयः॥

तेजस्विता भवता समा सूर्यादयोऽपि नु धर्षिताः।
निखिलं भवेद् भवता समं हृदि काङ्क्षया विगतं वयः॥

◆◆◆◆◆

हृन्निलयं समुपैषि कथम् ?

हृन्निलयं समुपैषि कथं प्रिय! राजहंस इव कासारम्।
त्वामनुरक्तमिदं हृदयं व्यथते वल्लभ! वारम्वारम्॥
त्वामनुरक्तमिदं हृदयं व्यथते वल्लभ! वारम्वारम्॥
सिकतासमुदयसमुत्थिता रुचिराकृतिरपि निपतति नचिरम्।
तदुपमिते तव हृदि निहिता सद्यो विस्मृतिमुपयाताऽहम्॥
त्वामनुरक्तमिदं हृदयं व्यथते वल्लभ! वारम्वारम्॥
मम पाषाणमये हृदि लिखितं ललिततरं तव रूपमिदम्।
कोऽस्ति समर्थो भुवि कर्तुं प्रस्तरलखितं वितथाकारम्॥
त्वामनुरक्तमिदं हृदयं व्यथते वल्लभ! वारम्वारम्॥
चिह्नमात्रमपि नाऽवशेषितं मृदुसिकतासमहृदये ते।
सञ्चरति स्पन्दनमपि मम घनपाषाणे नानाकारम्॥
त्वामनुरक्तमिदं हृदयं व्यथते वल्लभ! वारम्वारम्॥
मणिमयमण्डनमण्डलमपि समिदाज्यसमुज्ज्वलितं ज्वलनम्।
सारमयं भुवनं सहसा सञ्जातमिदम्मे निस्सारम्॥
त्वामनुरक्तमिदं हृदयं व्यथते वल्लभ! वारम्वारम्॥
उपहारीकृतमिदम्मनो मे त्वया कान्त! कथमवधूतम्।
तव विरसाशयता निर्घृण! समुपैति सततमतिविस्तारम्॥
त्वामनुरक्तमिदं हृदयं व्यथते वल्लभ! वारम्वारम्॥

◆◆◆◆◆◆◆

मृत्युरेव मृतः

सकलपथमपिधाय मनसो निभृतमासीनाऽस्म्यहम्।
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

मम निरपराधं मनो नु शलाकया किमु वेधितम्।
वीक्षणं तव मृदुलकान्तं कान्त! किं कुलिशायितम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

भूरिशः सुजना भवन्तु निकामशुभगुणराजिताः
मामकीने हतमनसि केनाऽपि नैव पदं धृतम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

को विशेषो विद्यते ते रूपगुणहृदयादिषु।
दृङ्निपतने मम मनः प्रिय! जायते विवशीकृतम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

कीदृशी रुचिरा त्वदीया माधुरी छलनामयी।
समवलोकितया यया ननु मूर्च्छना जनिता कथम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

भेदितं हृदयं मदीयं किं त्वयैव सहस्रधा।
प्रतिकणं निवसन् दयित! किमु पीडयसि हृदयं भृशम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

एकहृदि या वेदना नहि सैव कथमपि सह्यते।
अयि! सहस्रगुणीकृते हृदि पीडनं बहुलायितम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

दर्शनाऽभिरतं मनो विनियोजयति तनुधारणे।
विरहविषमथिता विकलिता धारये प्राणान्कथम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

किं व्यथाकुलिते मनसि न हिताहितं प्रतिभासते।
मृत्युरेव मृतो नु कं शरणं व्रजेन्मम मानसम्॥
त्वं समायातोऽसि केन पथा न जाने कौशलम्॥

◆◆◆◆◆◆◆

कथमिव न क्षीयते क्षपा

नीलाम्बर इव घनविततियुता अयि! कथमिव न क्षीयते क्षपा।
अयि! कथमिव न क्षीयते क्षपा॥
शयितः शान्ततरोऽयं लोको मामेकां बाधते व्यथा।
अयि! कथमिव न क्षीयते क्षपा॥
उडुमिषतोऽपि हसति घनरजनी विषं वमति रजनीकरभाः।
अयि! कथमिव न क्षीयते क्षपा॥
सुरसरितो विमलेऽचलसलिले ज्वलितेयं चलवह्निशिखा।
अयि! कथमिव न क्षीयते क्षपा॥
संप्रथिता या सकलधरायां क्वाद्य गता सा मनस्विता।
अयि! कथमिव न क्षीयते क्षपा॥
कथमपि लब्धसहजभावे हृदि जनितेयं कीदृशी व्यथा।
अयि! कथमिव न क्षीयते क्षपा॥
गिरितटिनीतुलितैरभिघातैर्भाववीथिका संमृदिता।
अयि! कथमिव न क्षीयते क्षपा॥
पुञ्जीभूता विपुलवेदना विधिविलसित इव दीर्घतरा।
अयि! कथमिव न क्षीयते क्षपा॥
सीमानं दृढतरमिति जाने किमिति मनः पीड्यते मुधा।
अयि! कथमिव न क्षीयते क्षपा
पुनरवलोकनमपि नो भविता मया हन्त! जीव्यते वृथा।
अयि! कथमिव न क्षीयते क्षपा॥

◆◆◆◆◆◆◆

अत एव न मे क्षीयते क्षपा

वाणी तव नूतनरससरसिता, किमिति कान्त! मे श्रवणगता।
अत एव न मे क्षीयते क्षपा॥
श्रुतिपथमभिगुञ्जति सा निशि निशि, निद्रा मे ननु तया हृता।
अत एव न मे क्षीयते क्षपा॥
वाङ्मधुनाऽभिरतैः परिवेशैः, कृता निशा जलधरभरिता।
अत एव न मे क्षीयते क्षपा॥
सुधारसैरनुपूरितमखिलं,श्रवणेतरकामना हता।
अत एव न मे क्षीयते क्षपा॥
रविणा यथा धृष्यते निखिलं, सकला धीर्धषिता तथा।
अत एव न मे क्षीयते क्षपा॥
मूर्तिस्तव सा रुचिरमनोज्ञा, नयनसम्मुखं सन्निहिता।
अत एव न मे क्षीयते क्षपा॥
दृष्टिस्तव नवमधुमधुराऽसौ, हृदये मे किं स्थिरीकृता।
अत एव न मे क्षीयते क्षपा॥
वाचा तव मथितं मम हृदयं, तटं सरिन्ननु तटङ्कषा।
अत एव न मे क्षीयते क्षपा॥
हसितयुतैस्तव सुमधुरवचनैः कुसुमसंहतिर्निर्झरिता।
अत एव न मे क्षीयते क्षपा॥
निर्बाधन्तु भवतु संलापो भवतु नाम शतगुणीकृता।
अत एव न मे क्षीयते क्षपा॥

♦♦♦♦♦♦♦

स्नेहबन्धनं विना

स्नेहबन्धनं विना शून्यमेव जीवनं
सन्तु कोटिशो जना मेऽस्ति किं प्रयोजनम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥
जन्मतोऽधुना मया यस्य नाम न श्रुतं
तं जनं विनाऽद्य मे जीवनं जडीकृतम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥
पूर्वजन्मनो विना संभवेदिदं कथं
दृष्टिपातनेन मे जीवनं त्वदायितम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥
नाऽस्ति कोऽपि परिचयो वाङ्मयो न विनिमयो
हन्त! वाङ्निवर्तने भाति चित्तभाषणम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥
शीतलत्वमस्य किं कथ्यते मनीषिभिः
स्नेहसंयुतं मनो मीयतेऽग्निसात्कृतम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥
दह्यते मनो भृशं विप्रयोगवह्निना
दृष्टिवारिणा विना शान्तिमेति नो चिरम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥
ऐन्द्रजालिकेन मे जीवनं विवर्तितं
बीजराशिनोषरे मानसेऽङ्कुरायितम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥
त्वामवेक्ष्य जीवनं साध्यतामुपागतं
दृश्यतेऽखिलं जगत् त्वां विना निरर्थकम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥
अयि! कियत्प्रतीक्ष्यते नो सखे! समीक्ष्यते
निर्गते तु जीवने किं भवेत् त्वदागतम् ॥
स्नेहबन्धनं विना शून्यमेव जीवनं ॥

◆◆◆◆◆◆◆

दयसे न किम् ?

अयि! दयित! हृदये वसन्नपि, दर्पितो दयसे न किम् ?
तव मनो दम्भोलिघटितं, पीडया व्यथते न किम् ?
अयि! दयित! हृदये वसन्नपि दर्पितो दयसे न किम् ?
वपुरिदं चित्रीयमाणं मम मनो मुञ्चति न किम् ?
दिष्टदोषान्मे त्वदीयं मानसं त्वतिदारुणम्॥
अयि! दयित! हृदये वसन्नपि दर्पितो दयसे न किम् ?
मन्दमन्दविलोकनेन, सुधासरसि विनिमज्जिता।
नाऽस्ति तृणमवलम्बनम्मे, वञ्चिता प्रिय! कथमहम्॥
अयि! दयित! हृदये वसन्नपि दर्पितो दयसे न किम् ?
अयि! मरुस्थलतामवाप्तं, स्नेहनीरविवर्जितम्।
खिन्नमिदमन्धं मनो मे, त्वत्प्रकाशविकाशितम्॥
अयि! दयित! हृदये वसन्नपि दर्पितो दयसे न किम् ?
तव सुधाधारारवैरभिनन्दितौ श्रवणौ मम।
कर्कशं प्रतिभाति मे मृदुतायुतं स्वरसङ्गतम्॥
अयि! दयित! हृदये वसन्नपि दर्पितो दयसे न किम् ?
कोकिला सहकारसङ्गमवाप्य या परितोषिता।
सा करीरकदम्बके, कण्टकमये रमते कथम्॥
अयि! दयित! हृदये वसन्नपि दर्पितो दयसे न किम् ?
तव गुणैरावर्जितं, क्वचिदपि न चेतश्चलति मे ।
मानसे मुदिता मराली, पल्वले नन्दति कथम्॥
